श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीबालाजिविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीबालाजिविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीश्रीनिवास ! भवतश्चरणारविन्दे
चित्तं मदीयमधुना विधिना निविष्टन्।
पद्मासनत्वमभजत्तदिहानुरूपं
श्रीभारतीललितविद्रुतदेहमस्तु॥ 1 ॥

वेलातीतदयारसार्द्रमनसे श्रीलालितस्वोरसे
शूलाधारशिवादिकीर्त्ययशसे मालाकरप्रेयसे।
नीलाम्भोधरवर्णरम्यवपुषे बालाजि संज्ञाजुषे
कोलालङ्कृतदिव्यदेशजनुषे नीलापुषे ते नमः॥ 2 ॥

दर्वीकरः श्रीरमणः किलायं
पुरामृतं तत्प्रददौ सुरेभ्यः।
दर्वीकराद्रावधुना कलौ च
दत्तेऽमृतं श्लाघ्यतमं नरेभ्यः॥ 3 ॥

पञ्चायुधे त्वयि निवेशितभावबन्धाः।
पञ्चायुधेन न सुतेन तवाभिभूताः।
पञ्चत्रयेण समवाप्य गुणान् समेतान्।
पञ्चात्मिकां तनुमिमां न पुनर्विशन्ति॥ 4 ॥

तत्पुत्रसम्मानकृतः पुमांसः
प्रभुं गुरुं वा परितोषयन्ति।

चित्रं त्वयीदं विमुखास्त्वदीये
सुते स्मरे त्वां परितोषयन्ति ॥ 5 ॥

यस्सन्ततं हृदि यदेव जनो विधत्ते
तद्रूपतां समधिगच्छति स क्रमेण ।
माता कृता हि जगतां भवता हृदीयं
माता ततोऽसि जगतामभया वयं तत् ॥ 6 ॥

विष्णुस्त्यक्ष्यति मेदिनीं कलियुगे हा हेति शास्त्रं जगौ
सत्यं तस्य किलापवादपदवीं शास्त्रं पुनर्गाहते ।
एतद्यत्तु कलौ हि वेङ्कटपतिर्भातीति संदृश्यते
का वान्यत्र तथाविधे गतिरियं तद्भक्तसम्भावना ॥ 7 ॥

अस्मद्देशिकसार्वभौमकथिता युष्मद्दया या परा
सा सत्यं मयि दुष्कृतैकनिलये भूयो नरीनृत्यति ।
नो चेत्क्वाहमहो क्व वा स च भवान् युष्मत्सभा वा सती
क्वेयं यत्र ममेदृशी पुनरियं लीलाक्षरी जृम्भते ॥ 8 ॥

मनोभवस्ते सहजः प्रियायाः
मनोभवो मे भवदात्मजातः ।
तस्यां यथा त्वां स रतं विधत्ते
तथैष मां त्वन्निरतं विधत्ताम् ॥ 9 ॥

यथा भवान् मन्मथतातपादः
तथा मनश्चापि हरे ! मदीयम् ।
ऐक्यं न पित्रोस्सहते कुमारो
यत्त्वन्नयत्येष मनो जघन्ये ॥ 10 ॥



sunder kidāmbi prapatti dot com

दत्तं मनो ननु मयाऽभवदीश्वराय
तत्तत्सुतो हि मदनस्स्ववशं विधत्ते।
स्वल्पेऽपि हन्त निरताय तदर्जनाय
हे शैल ! लक्ष्मणवचस्तव रोचतेऽद्य ॥ **11** ॥

शेषाहिशैलशिखरे विहृतिं भजन्तं
भाषाधिनाथमुखदैवतपूजिताङ्घ्रिम्।
योषाभिरामभुजमध्यमुदारभावम्
एषा जहाति खलु जातु न मे मनीषा ॥ **12** ॥

चक्षुःश्रुतेः गिरिवरे कृतभूरिलीलं
चक्षुःश्रुतेश्शिरसि भक्तिमतां च चित्ते।
चक्षुःश्रुते किमपि धाम रमानिवासं
चक्षुःश्रुतेश्च युगलं सफलं विधत्ताम् ॥ **13** ॥

परकालकवेस्सहस्रगाथाः
भगवद्वेङ्कटनाथगास्समस्ताः।
इति वेङ्कटनाथदेशिकेन्द्रः
स जगौ तत्त्वमतीव सूक्ष्मवेदी ॥ **14** ॥

इदमस्य दयाविदां प्रभोः
परकालस्य च सूक्तिवेदिनाम्।
अपि नैमिशसूक्तिवेदिनां
गिरिमाहात्म्यविदां च वेद धीः ॥ **15** ॥

सद्यः कश्यपपापहारिणि हरौ श्रीस्वामितीर्थाध्वना
श्रीसाकेतनिवासिनैजमहितक्रीडाचले भूतले।
वासं भेजुषि मे तमोमुषि दयापीयूषपूर्णात्मनि
श्रीमत्याश्रितकल्पके मम मतिः क्रीडां विधत्तां सदा ॥ **16** ॥

नो शान्तो वचसा सदा भगवतः कृष्णस्य भीष्मस्य वा
पाण्डोराद्यसुतस्सितासितमनास्तेपे मनस्यन्वहम्।
तद्दृष्ट्वा स पुनश्शशास भगवान् भीष्मस्तमग्रे नतं
श्रीमच्छ्रीनिधिदर्शनाय स ततो जातः परं निर्वृतः॥ **17** ॥

तादृक्षानन्ददायिन्यनघगुणगणे दैवते दैवतानां
साम्यान्मर्त्येषु तिर्यक्ष्वपि च बहुविधस्थावरेष्वप्युदीते।
आनन्दाख्ये विमाने वसतिमुपगते श्रीनिवासे निवासे
लोकानां सर्वलोकेष्वपि कृतवसतौ यातु वासं मनो मे॥ **18** ॥

स्वामिपद्मिनीतीरवासिने
स्वर्णभासुरश्रीविमानिने।
स्वामिने मम श्रीविलासिने
स्वान्तमर्पितं सर्वदेहिने॥ **19** ॥

कार्तस्वरास्ति जनतेति दयारसार्द्रः
द्रष्टुं ततश्च परिरक्षितुमेष नाथः।
कार्तस्वराकृतिरुपेत्य विमानभूमिं
श्रीस्वामितीर्थदिशि दत्तमुखो विभाति॥ **20** ॥

सहस्रफणभूधरे सकललोकसेव्ये शुभे
सहस्रनयनादिभिः सततमञ्जलिस्वीकृतैः।
सहस्रशिरसस्स्थले परिवृते नरैः पण्डितैः
सहस्रपदमण्डपे भगवतो दया वर्णिता॥ **21** ॥

मानसाधनकृतोपधानया
मानवानवितुमात्तशय्यया।
मानसान्तरुदिता मुदः पराः
मानिवास ! तव मूर्तिलीलया॥ **22** ॥

श्रीमद्वेङ्कटशेषागभुवि नित्यरतो हरिः।
श्रीमद्वेङ्कटशेषार्यभुवः स्तुत्या प्रसीदति ॥ 23 ॥

॥ इति श्रीबालाजिविंशतिः समाप्ता ॥

sunder kidāmbi prapatti dot com sunder kidāmbi